स्वत्याः स्वीकारः। पुनः कीदृशी लसन्मुखा। वेदानां वक्त्रनिर्गतत्वात् वेदजनन्याः सावित्र्याः लसन्मुखात्वेन स्वीकारः। एवं पंचविधा प्रकृतिः मुदिता आसीदिति
भावः। कीदृशं उत्थवं अंबरं अंबं शब्दं तदुपलक्षितज्ञानं राति ददातीति तं। अवशब्दे। पुनः कीदृशं पुष्करमालिनं। पुष्कराणां मालास्यास्तीति। पुनः कीदृशं अ
रविंदं। अरं शीघ्रं विंदति विद्ज्ञाने। पुनः कीदृशं परिमृष्टकुंडलं। उज्वलितवलयं ॥ २॥ हरपक्षे। व्रजस्त्रियः तं हरं वीक्ष्य नेमुरिति शेषः। कीदृशं तं कृष्णा
नुचरं कृष्णानाम्न्याः नद्याः वेणारूपेणानुचरं। तदा वेणा महेशो भूत् कृष्णाः कृष्णाभवन्नदीति गाणेशात्। पुनः कीदृशं प्रलंबबाहुं। प्रलंबाः शाखाद्रवदीर्घाः बा
हवो यस्य। प्रलंबो दैत्यशाखयोरिति त्रिकांडशेषः। पुनः कीदृशं नवकंजलोचनं। नवः स्तुत्योयः कंजः ब्रह्मा तस्मिन् लोचनानि यस्य तत्स्तुत्यत्वात्। नवोन
व्ये पुमान् स्तुतावितिमेदिनी। कंजः केशे विरिंचौ चेतिमेदिनी। पुनः कीदृशं पीतांबरं। पीतं नाशितं जगत्कारणं अंबरं आकाशं येन। संहारकारित्वात्। पुनः
कीदृशं पुष्करमालिनं। पुष्करेण सर्पभेदेन मालते। पुष्करं खें बुपद्मयोः। नारोगनागविहगनृपभेदे षुवारुणे। सर्पालंकृतत्वात्। पुनः कीदृशं लसन्मुखारविं
दं। रसत् प्रणवजपे सशब्दं मुखारविंदं यस्य। तारकोपदेष्टृत्वात्। पुनः कीदृशं परिमृष्टकुंडलं। परिमृष्टानि उज्वलितानि कुंडानि अग्निस्थलानि येन सः। य
जमानः। कुंडमग्न्यालये मानभेदे देवजलाशये इतिमेदिनी। तं लातिगृण्हातीति तं। अष्टमूर्तित्वात् ॥ ३॥ रविपक्षे। कृष्णवत् लोहवत् भकानामनुचरः। चुं
बकानुयथा लोहं संचरेत्तथा भकानामनुचरः। कृष्णास्या द्रौपदी नीली त्यादि क्लीबे मरीचलोहयोरितिमेदिनी। पुनः कीदृशं प्रलंबबाहुं। प्रलंबाः दीर्घाः।
बाहवः किरणरूपाः यस्य। पुनः कीदृशं। नवकंजानि नूतनकमलानि रोचयति प्रकाशयति। पुनः कीदृशं। पीतांबोरं शुद्धमितियावत्। अंबरं यस्य वस्त्रं यस्य।
अंबरं नहूयोर्व्योम्नि स्कंगंधं तरवस्त्रयोरितिमेदिनी। पुनः कीदृशं पुष्करमालिनं। पुष्कराणां कमलानां मा अलते शोभते येन। अन्यत् समानं ॥ ४॥ कृष्णपक्षे।

तामन्मनस्कामत्प्राणामदर्थेत्यक्तदेहिकाद्‌स्फ़केरुत्थवंकृष्णमेवेतिज्ञातवत्यः। कीदृशं। कृष्णायाः पांचाल्याः अनुचरं। कृष्णस्य अर्जुनस्य वा। विलोक्यदूषितांकृष्णामित्य
क्त्वाअसुनां अनुचरतीतिवा। पुनः कीदृशं। प्रलंबाख्ये देसे बाहुर्यस्य रामरूपेणबाहुः रामार्जुनयोर्बाहुरूपलंउद्योगपर्वणिविश्वरूपदर्शने। प्रलंबाः हारभेदाः बाव्हेर्य
स्य। प्रलंबोदैत्यभेदेस्यात्त्रपुषेपिपयोधरे। तालांकुरेपिशालायांहारभेदेप्रलंबने इतिमेदिनी। पुनः कीदृशं। नवाः कंजाः केशास्तैरोचतइति। कंजः केशेविरिंचौच। केश
रूपलं कृष्णस्य आदिपर्वणि पंचेंद्रोपाख्यानावसरे। सितकृष्णकेशइतिद्वितीयस्कंधोकेश्च पुनः कीदृशं। पीनांबरं। पुष्करमालिनं। लसन्मुखारविंदं। लसन्मुखं अरविंदं यस्य
पुनः कीदृशं। परिमृष्टकुंडलं। परिमृष्टानि शोधितानि कुंडानिदेवजलाशयास्तीर्थानियेनसतीर्थसेवी तं लाति। लादाने आदानेच। अनेनपदेनदशावतारा अपिगृह्यंते। यथा॥
परिमृष्टः उज्ज्वलितः कुः वेदरूपः शब्दोयेन तं परिमृष्टकुं। पृथिव्यांकुः समाख्यातः कुःशब्देपिप्रकीर्तितः। मनवेभगवान्प्राह मत्स्यः स्वां सांख्यसंहितां। डलमिति पृथक्पदं। डाव्
त्रासात्‌लातिरक्षति। डकारः शंकरे त्रासे॥ इतिमत्स्यः॥१॥ परिमृष्टानि कुंडानिदेवजलाशयायस्मिन्‌ तं मंदरं लाति गृण्हाति तं कूर्मरूपं। देवोद्यानैः शक्रभैर्दत्यैर्देवखातैश्च
भूषितं मज्जंतं मंदरं दृष्ट्वा स्वपृष्ठेधारयत्धरिरिति कूर्मः॥२॥ परिमृष्टाकुः भूमिः येन तं भूधरंवराहं। डलं डंशब्दं लातिगृण्हाति ध्वनिं कुर्वतमित्यर्थः। डकारः शंकरे त्रासेध्व
नौभीमेनिरुच्यते। इतिवराहः॥३॥ परिमृष्टानि नाशितानि कुंडानियेन तं हिरण्यकशिपुविदारणायस्तंभे लाति तं श्रीनृसिंहं। इतिनृसिंहः॥४॥ परितः मृष्टानिउज्वलितानि कुंडा
नियस्यतंदीक्षितंबलिं लाति निगृण्हाति तं वामनं। इतिवामनः॥५॥ परिमृष्टानिकुंडानि यस्मिन्‌ ततभूतलं लाति ददाति कश्यपाय तं परशुरामं॥ इतिपरशुरामः॥६॥ परितोमृष्टा
मधुराः दृष्टानिष्टकारिणामपिहितकारिणः साधवस्तान्‌ कुंडयति वेष्टयति पीडयति तं रावणं लाति निगृण्हाति तं श्रीरामं॥ इतिरामः॥७॥ कु उरक्षणे अनृतभाषणे वेष्टने चेतिधा
तोः। परिमृष्टकुंजान्‌ जीवतिपनावन्यतपुत्रसन्नान्‌ पांडवान्‌ लाति स्वीकरोति तं श्रीकृष्णं। अमृतेसारजः कुंडोमृतेभर्तरिगोलकः॥ इतिकृष्णः॥८॥ परिमृष्टकुं मार्जितभूमिं

तद्दृष्टत्वात्। डलं उंत्रासं लातिद्ददातितंत्ररूपेणान्यधर्ममवर्तकत्वात् तंबोध्यं। इतिबोधः॥९॥ परिमृष्टकुंडलंमार्जितभूवलयंम्लेच्छनाशेन तंकल्किनं॥१०॥ ॥१॥
॥रुचिस्मिताइति॥ तामन्मनस्काइत्यादिनाभगवद्रूपत्वेनउत्प्रेक्षितइत्यर्थः अग्रेएवंव्यवस्था। अयंकः आत्मा। कोब्रह्मणिसमीरात्मयमदक्षेपिभास्करे इतिमेदि
नी। इतितंपरिवव्रुः। तंकं। कस्येतिषष्ठीद्वितीयार्थकर्मणि। कं आत्मानमितिभावः। कुतः आत्मेतिज्ञानं तर्हि। अच्युतवेषभूषणः। इतिहेतुः। नच्युतेवेषभूषणेयस्य।
प्राकृ यथाद्दृष्टस्तथैवाधुनापिदृश्यते। अतः अविकारित्वादात्मैव। कीदृशंतं। उत्तमश्लोकपदांबुजाश्रयं। उत्तमश्लोकेतिपदस्य अंबुजस्य ब्रह्मणश्च आश्रयं। यद्वा। उ
त्तमश्लोकानांपुण्यश्लोकानांसत्कीर्तिनां पदांबुनो भागीरथ्याः जातस्यभीष्मस्यचाश्रयं। उत्तमाः श्लोकाः यस्मिन् तद्भागवतं तस्य पदान्येव अंबुजानि मौक्तिकानितेषामा

॥रुचिस्मिताः कोयमपीच्यदर्शनः कुतश्चकस्याच्युतवेषभूषणः॥ इतिस्मसर्वाः परिवव्रुरुत्सुकास्तमुत्तम

॥श्लोकपदांबुजाश्रयं॥ ३॥ ॥३॥ ॥२॥

श्रयमितिद्वितीये। रुचिस्मिताः। रुचिरुत्वंस्मितंयासांताः। रुचिवत् अग्निवत् मनसः दाहकंवास्मितंयासांताः। रुचिरप्यितमौर्बल्के इत्यमरः। रुचिः मूर्तः श्रृंगारए
वहासोयासांताः। श्रृंगारः रुचिरुज्ज्वल इत्यमरः। रुचिवत् ग्रीष्मवत् योगिनामपि तापदंवास्मितंयासांताः। आषाढवत् कामवृष्टिकरं। अमात्यवत् हितकरं। रुचिरवेतंअ
नुपहतंवास्मितंयासांताः। रुचिर्ग्रीष्माग्निश्रृंगारे प्याषाढे रुत्सुमंत्रिणि। ज्येष्ठे च पुंसिधवले रुत्ये नुपहते त्रिषु इतिमेदिनी॥ अपीच्यदर्शनः। कुतः। अच्युतवेषभूषणः।

अत्रप्रौढोक्तिरलंकारः।प्रलंबबाहुत्वादिनासिद्धस्यअपीच्यदर्शनिरूपकार्यस्यहेत्वभावेअच्युतवेषभूषणत्वहेतोःकल्पनात्।प्रौढोक्तिरुत्कर्षाहेतौतध्देतु
त्वप्रकल्पनं। कचाः कलिंदजातीरतमालस्तोमप्रेचकाः।कार्यातिशयाहेतौतध्देतुत्वप्रकल्पनंप्रौढोक्तिः। यथातमालगतनैल्यातिशयाहेतौयमुना
तटरोहणेतध्देतुत्वप्रकल्पनं। ॥२॥ तंप्रश्रयेणेतितृतीयश्लोके। विज्ञायसंदेशहरंरमापतेःइत्यत्र। विज्ञानां विशेषज्ञानवतांअयःशुभावहोविधिः तस्यहरं
तदर्थप्राप्तमितिभावः।रमापतेरितिपूर्ववत्कर्मणिषष्ठी। रमापतिमित्यर्थः॥३॥जानीमस्त्वामिति।चतुर्थश्लोके। यदुपतेःपार्षदमित्यत्र उग्रसेनसेवकं। भर्त्रा

तंप्रश्रयेणावनताः सुसत्कृतं सव्रीडहासेक्षणसूनृतादिभिः॥ रहस्यपृच्छन्नुपविष्टमासने विज्ञायसंदेशहरं
रमापतेः॥ ३॥ जानीमस्त्वां यदुपतेः पार्षदं समुपागतं॥ भर्त्रेह प्रेषितः पित्रोर्भवान्प्रियचिकीर्षया॥ ४॥ अ
न्यथागोव्रजे तस्य स्मरणीयं न चक्ष्महे॥ स्नेहानुबंधो बंधूनां मुनेरपि सुदुस्त्यजः॥ ५॥ अन्येष्वर्थकृता
मैत्री यावदर्थविडंबनं॥ पुंभिः स्त्रीषु कृता यद्वत्सुमनस्स्विव षट्पदैः॥ ६॥ ॥६॥ ॥६॥

उग्रसेनेन॥४॥अन्यथेति पंचमश्लोके तस्येत्यत्र। तस्यउग्रसेनस्य स्मरणीयमत्रकिमपिनास्ति।संबंधाभावात्॥त्वत्संबंधंज्ञात्वा त्वां प्रेषितवान्स्मि। ममस्नेहानुभावइ
तिचेत्। स्नेहानुबंधइति मुनेरपिबंधुस्नेहोदुस्त्यजइत्याहुः॥ ५॥ अन्येष्विति अर्थकृताकार्यनिमित्ता।विडंबनं अनुकरणमात्रं। नतुतात्विकीमैत्री पुंभिरितिदृष्टांतः।६॥

२६

॥७॥८॥९॥१०॥ काचिदिति प्रियेण श्रीकृष्णेन मां प्रसादयितुं प्रस्थापितोयं दूत इति कल्पयित्वा ऽब्रवीत्। यद्वा तस्मिन्नप्युद्धवे प्रियप्रस्थापितं दूतमिति दूतदृष्टिं कृत्वा मधुकरापदेशेन उद्धवमेवाब्रवीदित्यर्थः॥ यद्वा॥ मधुषु यादवेषु कं सुखं राति तं उद्धवं दूतमपि दूतत्वेन अव्यवस्थितचेतस्तया कल्पयित्वा अब्रवीत्॥ मधौ चैत्रे कं राति तं वसंताख्यं कालं दूतं॥ कालं मां विद्धि भगवन्देत्येन त्वामिहागतं॥ नियोगाद्ब्रह्मणो नेतुमिति कालस्य दूतत्वं॥ तं प्रियप्रस्थापितं कल्पयित्वा अब्रवीत्॥ भ्रमरपक्षेप्येष एव॥ प्रियप्रस्थापितं दूतं दृष्टवा तं उद्धवं मधुकरं कृष्णमिति कल्पयित्वा॥ मधौ तत्संज्ञके दैत्ये करोयस्य॥ कीदृशं कृष्णं इदं कामप्रदं॥ कामरवं डकं वा॥

॥ निस्वं त्यजंति गणिका अकल्पं नृपतिं प्रजाः॥ अधीतविद्या आचार्यमृत्विजो दत्तदक्षिणं॥ ७॥ खगा वीतफलं वृक्षं भुक्त्वा चातिथयो गृहं॥ दग्धं मृगास्तथारण्यं जारो भुक्त्वा रतां स्त्रियं॥ ८॥ इति गोप्यो हि गोविंदे गतवाक्कायमानसाः॥ कृष्णदूते व्रजं याते उद्धवे त्यक्तलौकिकाः॥ ९॥ गायंत्यः प्रियकर्माणि रुदंत्यश्च गतह्रियः॥ तस्य संस्मृत्य संस्मृत्य यानि कैशोरबाल्ययोः॥ १०॥ काचिन्मधुकरं ॥ दृष्ट्वा ध्यायंती कृष्णसंगमं॥ प्रियप्रस्थापितं दूतं कल्पयित्वेदमब्रवीत्॥ ११॥

अब्रवीत्। प्रियः यः प्रस्थः पर्वतः गोवर्धनस्तस्मिन् आपितं प्राप्तं दूतं॥ दूत इति वा दूयत इति वा दूतः तं। दूतो जवते र्वा द्रवतेर्वा वारयतेर्वा इति निरुक्तात्॥ यतः कृष्णसंगमं ध्यायंती॥ ध्यानेन हि सर्वत्र तद्रूपान्वीक्षणं॥ ११॥ ॥५॥ ॥११॥ ॥५॥ ॥१७॥ ॥५॥ ॥१॥ ५

मधुपेति। हेमधुप। कितवस्य धूर्तस्यबंधो। नोस्माकं अंघ्रिंमास्पृश। मामांनमस्कारेणमाऽर्थयस्वेत्यर्थः। तत्किमित्यपेक्षायांकृष्णवर्णस्यतस्यश्मश्रूणांलोहितत्वे
कारणमुत्प्रेक्षमाणाह। सपत्न्याः कुचाभ्यांलुलिता संमर्दितायाकृष्णस्यवनमाला अतएवतस्याः कुंकुमं येषुतैः श्मश्रुभिः उपलक्षितः। किंतुतासामेवमानिनी
नांप्रसादंमधुपतिर्वहतु। किमस्मत्प्रसादेनतस्य। यदुसदसिविडंब्यमुपहासास्पदं। कुतः यस्यदूतस्त्वमीदृक् ईदृशः। कृष्णपक्षे। यदुसदसीत्यत्र। यत्। उ। असत्। अ

॥गोप्य ऊचुः॥ मधुपकितवबंधोमास्पृशांघ्रिंसपत्न्याः कुचविलुलितमालाकुंकुम
॥श्मश्रुभिर्नः॥ वहतुमधुपतिस्तन्मानिनीनांप्रसादंयदुसदसिविडंब्यंयस्यदूत
स्त्वमीदृक्॥ १२॥

सि। इतिपदानि। हेमधुप मधुपालक। गूढाभिसंधित्त्कमद्यप। अतएवकितव। किंतु। अस्माकं बंधो। बंधुः संबंधनात्। नः सपत्न्याः कुचाभ्यांबिलुलितमालाश्म
श्रुभिः। अंघ्रिंस्पृश। त्वं ईदृक्। लक्ष्मीदृक्। मालक्ष्मीः मानिनीनां प्रसादंवहतु। यस्यदूतः। मधुपतिः। वसंतोपलक्षितः कालः। यतः। त्वं सत्। असि॥ ॥१२॥ ॥ ॥१२॥ २८

॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥

अन्येषिति ॥ अर्थकृता कार्यनिमित्ता ॥ पुंभिः स्त्रीषित्यादिना सामान्यस्त्रीपुरुषदृष्टांतेन रस्यं तं प्रेमलक्षणरूपस्तथ्यमेभिर्थादेवध्वनितः ॥ कुरस्त्रीणामंशोत्पन्नाभिरस्माभिः
गर्गवाक्यतो लोकोत्तरसुंदरः ईश्वरांशोयमवतीर्णः अतः अस्मिन् कृष्णे स्नेहः कृतः तथा सति अस्य प्राकृतवत् यावदर्थविडंबनं अनुकरणमात्रं नोचितमिति गूढाश
यः अत एवोक्तं नाटकचंद्रिकायां ॥ लघुत्वमत्र यत्प्रोक्तं तत्तु प्राकृतनायके नकृष्णे रसनिर्यासस्वादार्थमवतारिणि ॥ कृमनस्विति ॥ षट्पदैः भ्रमरैः ॥ यद्वा सार्ध
पञ्चभिः पञ्चभ्यो अर्धहीनाधिकमूर्खैरितियावत् ॥ कृमनस्कमालत्यादिषु ॥ यद्वा कुत्सुशोभनं निकृष्टगामित्व कापट्यादिदोषरहितं मनो यासां तासु ॥ पंडि
तोपि वरः शत्रुर्न मूर्खो हितकारकः इति न्यायमविसृज्यात्र । अयंभावः । यथा भ्रमरेण पुष्पमकरंदमवघ्राय पश्चात्परित्यागो विधीयते तथा यावदर्थप्रयोजनेनानेन
श्रीकृष्णेन कृमनः सूक्ष्मणीनांस्त्रीणामिति वचनात् तत्सा धर्म्यवतीषु गोपीषु अत्यासक्तिप्रदर्शनपूर्वकं अस्मदीयतारुण्यमकरंदरसमास्वाद्य पश्चात्त्यक्तवान्
एतादृशो नीचगामी मूर्खोयमस्माभिः प्राकृन ज्ञातइत्यभिप्रायः ॥१॥ निस्वंत्यजंतीति ॥ निर्गतं स्वं तारुण्यरूपं धनं यस्मात् तं गोपीसमूहं अत्यजत् । अत्र विपरीत
लक्षणया संगतिः ॥ तारुण्यविक्रयेण पण्यस्त्रीशब्दव्यवहार इति प्रसिद्धं ॥ अनेन श्रीकृष्णात् वयोवैशिष्ट्यं स्वस्य प्रदर्शितं ॥ अकल्पमिति ॥ अलौकिकरतिप्र
कारजन्यश्रमासहिष्णुमित्यर्थः ॥ तरंगसंगप्रमुदाकुलेंद्रियाः केशान् दुकूलं कुचपट्टिकां वा ॥ नांजः प्रतिव्योढुमलं व्रजस्त्रियो विस्रस्तमालाभरणाः कुरू
द्वहेति ॥ अत्रैकवचनस्थले जातावेकवचनं ॥ अधीतविद्या इति इदमत्राकूतं ॥ असौ श्रीकृष्णः बालत्वात् कामशास्त्रानभिज्ञ एवासीत् ॥ यथा मुंचांचलं
चंचलपश्यलोकं बालोसि नालोकयसे कलंकं ॥ भावं न जानासि विलासिनीनां गोपालगोपालनपंडितोसि ॥ अस्मत्तः अधीत कामविद्य इति ध्वनिः ॥ अत

एवंरासपंचाध्याय्यंतर्गतद्वात्रिंशाध्यायेगोपीकृतप्रश्नोत्तरदानप्रसंगेगुरुर्द्रुहइति श्रीभगवताउक्तं अस्यस्वामिचरणैः अतिकविनाः उपकर्तागुरुतुल्यः त
स्मैद्रुह्यंतीतिव्याख्यानंकृत्वा अंग्येचरमकोटिगतमात्मानंमत्वा अक्षिसंकोचैः परस्परंगूढस्मितसुखीरित्युक्तं॥ ऋत्विजइति ऋत्विजइतिबहुवचनांतोवा
च्यार्थः॥आध्वर्यकर्मकारीऋत्विकुलस्यार्थः॥ यद्वा ऋतौऋतौ रजसिरजसि यजंतेसंगतिंकुर्वते ऋत्विजः श्रीकृष्णाः पूज्यतावबहुवचनं॥ यजेदे
वपूजासंगतिकरणदानेषु इत्यनेनयजतेः संगतिकरणार्थत्वं॥७॥ दत्तदक्षिणमिति दक्षिणाज्ञानसंदेश इत्कदात्तत्वाद्रसशास्त्रज्ञानसंदेशरूपाद
तादक्षिणायेनतादृशंगोपीगणमित्यर्थः॥ यद्वा दत्तंस्वानुकूलंयेन। अभीष्टप्रदमित्यर्थः अनुकूलदक्षिणशठधृष्टश्चेतिनायकभेदाः तत्तल्लक्षणविशि
ष्टत्वंनायिकाणामपिज्ञेयं॥१॥ अस्यैवान्यार्थनिदर्शनैः प्रपंचइतिस्वामिमतिज्ञातार्थानांश्रीमन्नारायणगुरुकृपालेशेनायंविन्यासइतिरसिकैःसंतोष्ट
व्यं॥२॥ खगावीतफलमिति। वृक्षेत श्रीकृष्णविरहरूपशस्त्रेणछिद्यंतेइतिवृक्षः तंस्वदेहरूपमित्यर्थः॥ वीतफलं विगतेफलेकुचरूपेयस्यजीर्यमाण
कुचमितिभावः॥ छिन्नोवृक्षःविगतफलोभवतिइतिप्रसिद्धं॥ यद्वा एकायनोऽसाविितिश्लोकोक्तः व्यष्टिसमष्टिदेहरूपः वृक्षः तस्यद्वेसुखदुःखफले
अतः वीतफलंसुखदुःखानुसंधानशून्यमित्यर्थः॥ सस्यव्यष्टिदेहांतःपातित्वादितिभावः॥ यदनुचरितलीलाकर्णपीयूषविप्रुट्सकृददनविधूत
द्वंद्वधर्माविनष्टाः॥ असत्तुल्याकृतनाइत्यर्थः॥ तथाविधानयस्मान्नृव्यसृजदितिभावः॥ द्वासुपर्णासयुजासखायइतिश्रुत्याखगत्वमेतस्यप्रतिपादि
तं॥ द्वौजीवविश्वेरौसुपर्णौखगौहिखगोत्यादिवृक्षइदमप्युक्तं॥ अयंभावः॥ सर्वप्रपंचंजीवयतिइतिश्रीकृष्णरूपोजीवःखगः अन्वर्थकः॥ याव

२८

हारिकदशायांस्त्रीणांपतिः ईश्वरः। तयोरन्यः पिप्पलंस्वाद्वत्तीति इति श्रुत्युक्तत्वादस्मदीयं देहरूपवृक्षस्य सुखदुःखरूपफलयोः भोक्तृत्वं नस्यैव भोग
स्यचिदवसानत्वात्॥ भोक्तृत्वे सुखदुःखानां पुरुषं कारणं विदुरिति कपिलगीतोक्तेः॥ पतिस्तु केवलं तद्द्रष्टा न तु भोक्ता एतदत्रैवोक्तं॥ तत्प्रभृति नान्य
समक्षमंगस्थातुं त्वयाभिरमितावनपारयामः॥ अन्यत्रापि नराधाभर्तारं कंचिदपि च दृग्भिर्गृहगतं॥ समाद्राक्षीन्नित्यं तव सरससूर्तिं विलिखति
इति॥ तुच्छास्ते नरोचंते अतः हस्तांतीयखगानुकरणं माकुरुष्वेति गूढाशयः॥ श्रुतेः द्वितीयपदार्थः स्फुटः चतुर्थपादार्थो यथा अन्यः पतिरूपः ख
गः स्वसुखफले अभुंजानोपि अभिमुख्ये विनविराजते मदीयं यं भार्येत्यभिमन्यते त्यर्थः तस्यान्यथाभिमानइति भावः॥ खगावीतफलं वृक्षं इत्यस्य
व्याख्यामुख्यश्रुत्यर्थानुरूपा भवितुं शक्यात थापि गोपीनां संप्रतितादृशार्थस्य अविवक्षितत्वादुपरम्यते॥ भुक्त्वा चातिथयो गृहमिति॥ तिथौ तिथौ
थौ नायातीत्यतिथिः कादाचित्कः धर्मस्यात्मातिथिः स्वयमिति स्मृतेः अस्माभिर्धर्मबुध्योपलक्षितः अतिथितुल्यस्त्वं द्विजिश्रेष्ठोवा अतिथिस्त्व
गृहिणः अन्नं भुक्त्वा गृहं त्यजति श्रीकृष्णस्तु गृहीणां गोपानां गृहं गृहिणीं गृहिणी गृहमुच्यते अतस्तां भुक्त्वा अत्यजत्॥ इतितद्वैशिष्ट्यद्योतक
उपहासोक्तिरूपो ध्वनिः॥ दग्धं मृगास्तथारण्यमिति॥ नूतनसस्यांकुराग्रान्वेषणशीलः मृगः तत्तुल्यः नवप्रियः श्रीकृष्णः स्वविरहाग्निनादग्धं नः
देहं नोचेदयं विरहजाशु उपयुक्तदेहाइत्यभिधानात् दग्धपरवत् प्रतीतिमात्रं ज्ञात्वा त्यक्तवानिति ध्वनिः॥ जारो भुक्त्वा रतां स्त्रियमिति॥ रता
मनुरक्तां अतृप्तामित्यर्थः॥ अनेन श्रीकृष्णेस्वस्यातितृष्णयोतिनमिति संवरमणीयं॥ ३॥ ८॥ ॥ ८॥ ॥ ८॥ ॥ ॥

काचिन्मधुकरमिति ॥ काचित् ॥ अनिर्वचनीयाभिधा श्रीराधेतिभज्यते ॥ गोपालंचपो ॥ लक्ष्मीरभितस्त्रितमागोप्यालक्ष्मीतमाः प्रथिताः ॥ रा
धागोपितमाचित्तस्याः काशासमावामाऽऽति ॥ यद्वा केनभानुना आसमंतात् चितुं संज्ञानंयस्याः भानुनंदिनीत्यर्थः ॥ यद्वा केसुखेचितुविज्ञा
नंयस्याः सा यद्वा कः आनंदोहरेस्तनुरित्येकाक्षरात् आनंदोब्रह्मेतिश्रुतेः आनंदमूर्तिं श्रीकृष्णं आचिनोतिवशयतिसा ॥ यद्वा केनश्रृंगार
रसेन आचिताव्याप्तासारसरूपेतियावत् ॥ अतएवगीतगोविंदटीकायांवनमालिकृतायां रः कामः अधिकंयस्याः साराधिकेतिविवरणं ॥ ॥

श्रीगणेशायनमः ऊनत्रिंशेतुरासार्थमुक्तिमत्फकयोहरेः गोपीभीरासस्ंरभेतस्यचांतर्ध्धिकौतुकं १ ब्रह्मादिजयसंरूढमूढकंदर्पदर्पहा जयतिश्रीपतिगोपीरासमंडल
मंडनः २ ननुविपरीतमिदंपरदारविनोदेनकंदर्पविजेतृत्वप्रतीतेः मैवं योगमाया मुपाश्रितः आत्मारामोप्यरीरमत् साक्षान्मन्मथमन्मथः आत्मन्यवरुद्धसौरतइत्यादि
षुस्वातंत्र्याभिधानात् तस्माद्रासक्रीडाविडंबनंकामविजयख्यापनायैवेत्यवत्तत्वं किंच शृंगारकथापदेशेनविशेषतोनिवृत्तिपरेयंपंचाध्यायीतिव्यक्तीकरिष्यामः ताराज्ञीः
याताबलाव्रजंसिद्धामयेमारंस्यथक्षपाःइतिप्रतिश्रुताइत्यर्थः ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसःश्रियः ज्ञानवैराग्ययोश्चापिषण्णांभगइतींगनेति भगवानपिरंतुमनश्चक्रे
इदंपरस्त्रीरमणं आत्मारामस्यभगवतःनयुक्तं इतिचेत् योगमायामुपाश्रितः यद्वा योगाय गोपीभिःसाकंस्वसंयोगाय मायाकृपातामुपाश्रितः मायादंभेकृपायांचेतिकोशः य

श्रीशुकउवाच भगवानपिताराज्ञीः शरदोत्फुल्लमल्लिकाः वीक्ष्यरंतुं

द्वा योगोवस्तुःसंयोगोविद्यतेयस्याःसायोगा मत्वर्थीअर्शआद्यच् योगाचासौमाचेतिकर्मधारये योगमाइतिभवितव्यं योगमेत्यत्रपुंवद्भावः यथाकृष्णाचतुर्दशीत्यादि यो
गमालक्ष्मीःतस्यामुपाश्रितोपि ताःवीक्ष्य रंतुंमनश्चक्रे इतिलक्ष्म्याअपिअतिशायितंतासांप्रेमसौभाग्यं भगवतःप्रेमवश्यत्वात् यद्वा तासां योगाय स्वात्मनायोजनायमा
ङ्मानेशब्देच इत्यस्मान्मायःशब्दः मीयतेर्थेविकाचयस्मात्सःमायः लिंगंयद्दृष्टदृश्ययोरितिभागवतोक्तेर्वा मायःशब्दःयस्यास्तांवंशीमुपाश्रितः यद्वा स्वस्मिन्

३०

१

योगाययामामतिस्तामयते भापयतिस्वमधुरध्वनिनायासायोगमाया वंशीतामुपाश्रितः यद्वा तासामपियोगाय नृत्यरतिविहारादिना भगवतः संयोगाय मायाकृपाय
स्यात्तांराधांउपाश्रितएव रंतुंमनश्चक्रे तत्कृपयैवस्त्रीभीरमणायप्रवृत्तिः अनेनभगवतिभाववतांसर्वजनानांभगवद्रमणाय श्रीमत्याःराधायाः कृपाभवति तामा-
श्रितोपिभगवान् तद्रमणेप्रवर्त्ततइति नतस्यांकदाचिदपिमात्सर्यादिसंभावनालेशोपि यदा तद्भक्तानामपिनक्रोधमात्सर्यादिसंभावना तदा भगवत्याःकिमुवाच्यं
किंच स्वामिनः यत्र स्वरूपदानेपरिमितशक्तिस्तत्र स्वभोगसंकोचनभयात्सामरीणांसापत्न्यभावोभवति यत्रापरिमितशक्तिभगवान् स्वामी तत्रस्वभोगसंकोचनभयासं
भवादसंभावितएवतद्गतानांमात्सर्यादिरितिभावः यद्वा यः अगमायां उपाश्रितः इतिपदानि यः अगांनिश्चलांमायांकृपांउपाश्रितः यद्वा यो भगवान् तासां अगा-
निश्चलायामामतिस्तस्यामुपाश्रितःसन् रंतुंमनश्चक्रे यद्वा तासां अगा अनपगामिनी नित्यायामा शोभा तस्यामुपाश्रितः यद्वा अगास्वचांचल्यंपरित्यज्यनित्यसंस
कायामालक्ष्मीस्तस्यामुपाश्रितोपि यः सः ताः वीक्ष्यैव तत्प्रेमोत्कर्षितविह्वलितदृष्टिविमालोक्यैव अनागताअपिताः वेणुसाहाय्येनाहूय रंतुंमनश्चक्रे इति चित्रं
तासांमेमसौभाग्यसौष्ठवं यद्वा अयोगमायां उपाश्रितः इति अयस्कांतमणिंमतिअयोवत् स्वतोगताः अयोगाः गोपदाराः तेषु मायां कृपांउपाश्रितः यद्वा भगवा
नपियांउपाश्रितः साराधापि अयोगमा अन्यासांअयोगायमाशोभायस्याः यांदृष्ट्वानान्यस्यां कृष्णमनोरमते इतिभावः अत्र कश्चन शंकते शारदात्रिषुउत्फुल्लमल्लि
कात्वं कथं तर्हियोगमायामुपाश्रितः अपिशब्दात् पूर्वंकेनापि रंतुंमनः कृतं इतिध्वन्यते च आदौरक्ताभवेन्नारी पुमान्पश्चात्तदिंगितैः इतिवाक्येनापि पूर्वंस्त्रीकृ
तरमणेच्छा पश्चात् पुंकृताइति अतः अर्थांतरं कल्प्यं योगमा यां उपाश्रितः योगेनमीयतेयासायोगमाराधिकास्मृता इतिपाद्मे सायोगमाराधा ताः शारदोत्फुल्लम
ल्लिकाःरात्रीःवीक्ष्य रंतुंमनश्चक्रे यांउपाश्रितः भगवानपिमनश्चक्रे इति चराधानामोच्चारः कुत्रापिभागवते नवर्त्तते कथंराधिकांउपाश्रितः रंतुंमनश्चक्रे इतिचेत्
अनयाराधितो नूनंभगवान् हरिरीश्वरः इतिवाक्येनराधासहितत्वं दृश्यते अतः युक्तमिदमर्थांतरं अत्रापि राधयादृतः युक्तः राधेत इतिस्याद्राधितइति कथं इतिचे

त् शकंध्वादिषु पररूपं वाच्यं इत्यनेन राधित इति सिद्धं अत्रापि शंकैव यां उपाश्रितः इत्यनेन गोपीभिः साकं रासाभावः सूचितः च याताबलाव्रजं सिद्धामयेमा रंस्यथक्षपा इति पूर्ववाक्यस्यापि मिथ्यात्वापत्तिः स्यात् इति चेत् पूर्वताः गोप्यः शरदोत्फुल्लमल्लिकाः रात्रीः वीक्ष्य रंतुं मनश्चक्रिरे पश्चाद्भगवानपि शरदोत्फुल्लमल्लिकाः दो अवखंडने इति धातोः शराद्यंति अवखंडयंति ताः शरदाः शरदाः उत्फुल्लमल्लिकाः विकसितमल्लिका पुष्पाणि यासु ताः शरदोत्फुल्लमल्लिकाः ताः गोपीः रात्रीश्च वीक्ष्य रंतुं मनश्चक्रे यद्वा रात्रीरिति गोपीविशेषणं रादाने इत्यस्माद्दानपराउदारा सर्वस्वत्यागशीला इत्यर्थः चः भगवान् रंतुं मनश्चक्रे इत्यनेन स्वतः भगवान् रेमे इति विहाय मनश्चक्रे इति कथं इति चेत् मनः कृतं कृतं कर्म न शरीरकृतं कृतं इति न्यायात् अयं रासः मनः पूर्वश्चेत् तर्हि समीचीनः स्यात् नान्यथा इति विचिन्त्य प्रभुणान्यकर्मभ्य

मनश्चक्रे योगमायामुपाश्रितः १

स्तन्निष्काश्यात्र रासे योजितं यद्वा अघटितघटनापटुत्वमत्र प्रकटयितुं निजमेव रासकेलौ रतिरससुखभागकारि नूनं यदुपतिनापि मनो नपुंसकं तत् १ विनांतरंगं नान्यस्त्रीसंयोगो जनदृष्टिगः सिध्यत्सनंतरायोस्मिन्निनीशस्तदकल्पयत् २ अमनस्कोपि प्रभुरिह रंतुं शक्नोत्यनिंसवैभवतः यदकृतमनस्तदर्थं निह्नीजं तत्त्वरूपरक्षैव ३ परधनपरदारहरणदं नमनुते मनोत्र हेतुरयं यत्तार्किकावदंति मनोणुरूपं च निसं च ४ यद्वा इंद्रियाणां मनश्चास्मीति पूर्वोक्तात् कृष्णेन स्वस्य मनसश्चाभेदमभिप्रेत्य मनः कृतं इति वा आत्तां मत्कृतमनुसरामः लापनांतरं च क्रियते तत्सक्षेपदान्येवं भगवान् अपिता अरात्रीः शरदोत्फुल्लमल्लिकाः वीक्ष्य। रंतुं मनः चक्रे यः अगमायां उपाश्रितः यः प्रभुः कीदृशः भगवान् भगौ चंद्रसूर्यौ नेत्रत्वेन विद्येते यस्य सः च अपिता न पिता यस्य सः समासांतवि

धेरनिसत्वात् नद्यक्रूतश्चेतिनकप् च अरात्रीः अराणि आसमंतात् त्रायेततत् अरात्रं कदर्शनं तत् आत्मनः भूषणत्वेनइच्छतीति अरं शीघ्रेचचक्रांगे शीघ्रगे पुनर
न्यवत् इतिमेदिनी अगमायां गोवर्धनविषयककपटं उपाश्रितः यद्वा गोवर्धनस्यमा शोभातस्यामुपाश्रितः शरदोत्फुल्लमल्लिकाः शरैर्द्यतिसमदनः तेनोत्फुल्लमल्लि
काः पुष्पवतीः गोपीः रात्रीश्चवीक्ष्य रंतुंमनश्चक्रेइत्यलं । गणेशपरार्थः आरब्धस्यपरिसमाप्त्यर्थंमंगलमाचरितव्यमितिन्यायात् गणेशरूपवस्तुनिर्देशात्मकंमंग
लमाचरतिकविर्व्यासः तत्पक्षे पदान्येवं भगवान् अपि तारात्रीः शरद उत्फुल्लमल्लिकाः वीक्ष्य रंतुं मनः चक्रे योगमायामुपाश्रितः हे शरद कल्याणकार
करद शंकरत्वं शंकरः श्रेयः शश्वसीम्निनिगद्यते त्वांवीक्ष्याहं रासेरंतुं नामपंचाध्यायीं कर्तुंमनश्चक्रे चक्रे इत्युत्तमपुरुषैकवचनं कीदृशस्त्वं भगवान् षड्गुणैश्वर्यसंप
न्नः वा भैर्गच्छतिइतिचंद्रः भूषणत्वेनइच्छवियतेयस्यसः तारात्रीः तारात्रं वरेण्यं आत्मनः शिष्यत्वेनइच्छतीति आत्मनः क्यच् उत्फुल्लमल्लिकाः माद्यंतितेमदः उत्फु
ल्लाश्चतेमदश्चउत्फुल्लमदः तान् लीयतइतिउत्फुल्लमल्लिः उत्फुल्लमल्लिनापाशांकुशेन काययतीति उत्फुल्लमल्लिकाः कैगैरैशब्दे विभ्वपाशब्दवत् योगमायामुपाश्रितः॥
रामपरोर्थः हेराम त्वांवीक्ष्याहं रंतुंमनश्चक्रे त्वंकीदृक् भगवान् भगंश्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु इतिकोशेनयोजनीयं च तारात्रीः तारात्रं सुग्रीवंआ
त्मनः मित्रत्वेनइच्छतीति च शरदोत्फुल्लमल्लिकाः शरान् द्यंति खंडयंति तेशरदाः तेचतेउत्फुल्लमदश्चरावणकुंभकर्णादियस्तान् लीयतइति शरदोत्फुल्लमल्लि
शरदोत्फुल्लमल्लिनाधनुषा काययतीति शरदोत्फुल्लमल्लिकाः योगमायां सीतां योगमायापिसीतेतिजाताजनकनंदिनीतिवचनात् तामुपाश्रितः अलं विस्तरेण

तदोडुराज इति तदा तस्मिन्नेव क्षणे तत्प्रीतये उडुराज उदगात् उदितः किंकुर्वन् दीर्घकालेन दर्शनियस्य सः प्रियः स्वप्रियायाः मुखमरुणेन कुंकुमेन यथा विलिंपति तथा प्राच्याः ककुभः दिशः मुखं शंतमैः सुखतमैः करैः रश्मिभिः अरुणेन उदयरागेण विलिंपन्नरुणीकुर्वन् इत्यर्थः स प्रसिद्धः उडुराजः चर्षणीनां जनानां शुचः तापग्लानीः मृमृजन् अपनयन् कश्चनात्र शंकते प्राच्या इत्यनेनैव पूर्वदिग्ग्रहणं जातं ककुभ इति पदं पिष्टपेषणवदसमंजसं इति चेदर्थांतरं कल्पनीयं उडुराजः कीदृशः ककुभः केन कौ भातीति ककुभः केन स्वस्वरूपेण कौ पृथिव्यां पार्थिवदेहप्राकृतेपि भातीति तथा च किमु वाच्यं प्रेमरसानंदगोपीदेहेषु यद्वा केन कुभातीति ककुभः केन स्वस्वरूपेण कुकुत्सितेष्वपि स्त्रीशूद्रादिषु पापयोनिषु दुराचारेष्वपि भातीति करैः कं सुखं रांति तैः करैः यद्वा के कौ भातीति ककुभः के स्वर्गमंडलेन कौ पृथिव्यां कांत्या भातीति तथा पुन

तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिंपन्नरुणेन शंतमैः सचर्षणीना

श्च कीदृशश्चंद्रः दीर्घदर्शनः इदं हेतुमभितिं विशेषणं दीर्घमर्थं दर्शयति तथा अयमभिप्रायः उडुभी राजते इत्युडुराजः इत्यात्मनः उडुराजत्वेन इदं सूचयति यथाहं बहुभिरुडुभिः स्वकांताभिः राजमानः तथैव मद्वंशप्रादुर्भूतेन त्वयापि भाव्यमिति दर्शयति नचात्र बहुदारसंग्रहे यशोहानिश्चिंता यथा उडुभी राजमानस्य मम उज्ज्वलाप्रभा के स्वर्गे कौ पृथिव्यां प्रसृता तथैव तवापि कीर्तिः बहुदारसमागमेन कं कुं भासयिष्यतीति दर्शयति नच कुत्रापि तव परदारत्वशंका तारापतित्वेपि मम बुधोद्भवप्रभाविस्तारः तव पूर्णवितारत्वेन रमणेपि तव यशसा सर्वस्यापि बोधोद्भवविस्तारश्चेति न मम प्रतारस्य प्रतारकत्वं किंच सर्वमनोरूपस्य मम यदा न कुत्रापि परत्वदृष्टिस्त

दासर्वात्मकस्य तवनतत्संभावनागंधोपीतिदर्शयति किंच यथोडुभीराजमानेनापिनिःशंकेन स्मरराजप्राच्यामुखं अरुणेनविलिप्यते तथात्वयापिस्वकांतयाप्रियामुखेकेना पिनिःशंकेनसर्वासांमुखं अरुणेनकुंकुमाद्यंगरागेणलेपनीयमितिदर्शयति किंचयथोडुराजस्यापिममप्राच्याः पूर्वस्थितायाः आदरः तथात्वयाप्रियायाश्च बहुदाररम णेपिप्राच्याः पूर्वस्थितायाः प्रकृष्टपूज्यायाः नित्यप्रियायाः आदरो नविस्मर्तव्य इतिदर्शयति किंच यदाकुलवृद्धस्यापिममेदृक्विलासस्तदा किमुवाच्यं तवनतत् कुलन वकिशोरस्येत्यादिदर्शयितोदीर्घदर्शनत्वं युक्तमेव यदैव रंतुंभगवान्मनश्चक्रे तदैवउडुसदृशर्तुषुराजतेइत्युडुराजः ऋतुराजः रकारडकारयोःसावर्ण्यमभिप्रेत्य उरु धाराजमानोवा तथा ककुभः कात् कुःभासनेनेतिककुभः कात् स्वर्गादपिकुःभूमिः विकसितस्मरमनोभिभत्यिनेनेति उद्गात् तथा प्रियः प्रियतमकृष्णसारूप्यतयाप्रेष्ठः

मुदगाच्छुचो मृजन्प्रियःप्रियायाइवदीर्घदर्शनः २

तथा दीर्घदर्शनः वर्तमानात् शरत्समयात् दीर्घकाले संभावितंदर्शनंयस्य तथा स्वयमेवकालातिक्रमेण भगवद्रमणोत्साहेन प्रादुर्भूतत्वात् सबहुविलक्षणोवसं तः विरहिणांशुचः करैः प्रियसंगतानां शांतप्रैः स्वोद्दीपनविभावैः चर्षणीनां उत्कब्युत्सवैव रंतुंगंतुमुद्यतानांशुचोमृजन् प्राच्याः प्रकर्षेणपूज्यायाः कृष्णप्रिया याः व्रजभुवःमुखं श्रीमद्वृंदावनं अरुणेनविविधोच्चलितस्वानुरागतयासंभावितकिंशुककादिशोणसुमनःसमूहेन विलिंपन्नुद्गतः अत्रप्रियायामुखं अरुणेनलिंप न्नित्युक्त्वा वसंतसंभावितहोलिकाद्योतनमपिज्ञेयं यदा तद्रमणमनोनुसारेण एषः उडुराजः चंद्रः प्रियायाः प्राच्याः ककुभः मुखं अरुणेन लिंपन्नुद्गात् तदैवसप्रियो

दीर्घदर्शनोभगवानपिचर्षणीनांशुचोशंतमैः करैः मृजन्व्रजाद्दुःखविहारस्थलमगादित्यर्थः कथंभूतः सः भगवान् दीर्घदर्शनः दीर्घे पद्मदलायते दर्शने नेत्रे यस्य
तथा ककुभः केनसुखरूपेण कोपृथिव्यां अवतीर्णोपिभातीति यद्वा कस्यब्रह्मणोर्थे कोअवतीर्यभातीतिवा कोब्रह्मापिकुत्सितोभातियस्मादितिवा केब्रह्मणिकु
कुत्सितेस्मदादौचसमानएवभातीतिवा सर्वेश्वरत्वादलुप्तदृक्त्वं २ २ २ २ २ २ २

॥ सः भगवानित्यनुषज्यते ॥ सः भगवान् । रमणभक्तजनमनोनुसारेणो द्भूतं भक्तानां भजनानंदं गोपीनां श्रृंगाररसं वसंतं चंद्रं प्रियामुखं गोपीसमूहं वनं च दृष्ट्वा कलंजगौ इत्यन्वयः॥

त्वेन दृष्ट्वेति । कुमुत् कुमुदं विकसनीयैर्विद्यतेयस्यतं कुमुद्वंतं ॥ यद्वा कुमुत् चंद्रिका तद्वंतं । नित्यपूर्णतयानखंडं मउलंयस्य । रमायाः आननस्य आ भेवाभायस्य । तद्भात्त्वात् । नवकुंकुममिवारुणं उदयरागोयस्य तादृशं ॥ तत्र चंद्रिकया रमास्मितसाम्यं । कुमुद्विकासस्य रमाननेन कृष्णदृक्कुविकाससाम्यं । अखंडमंडलत्वेन मुखवर्तुलत्वसाम्यं । आभाया आल्हादकत्वसाम्यं । श्रृंगारांगरागेणोदयरागसाम्यं ॥ तथाचवनं तस्य कोमलैः स्पर्शैः गोभिः किरणैः अभि रंजितं दृष्ट्वाकलंजगौ अगायत् । तथाचवनस्य चंद्रगोभीरंजितत्वकथनेन तमोरजोवर्णपत्रपुष्पसमुदायस्य सितिप्रकाशाल्हादात्मकसत्वाभ चंद्रप्रभाभिभवद्योतनेन सत्वेन रजस्तमोपि भवेभगवद्रमणयोग्य

॥ दृष्ट्वा कुमुद्वंतमखंडमंडलं रमाननाभं नवकुंकुमारुणं ॥ वनं च तत्कोमल

तादर्शिना ॥ तथाचंद्रेण स्ववंशप्रभवकृष्णदर्शनजाताल्हादेनामृतरसात्मकसितप्रभयाविश्वमभिव्याप्यस्ववंशोत्सवेस्वपितुः क्षीरनिधेरभिवृद्धिः कृता ॥ ॥

तत्र भजनानंदपक्षे । कौ पृथिव्यां तद्भक्तसर्वजनेषु मुत् यस्यां कुत्सितेष्वपि स्तोत्रोरेणवामुत् यस्यां तादृक् भक्तिमभावंतं । अन्यधर्माणामिव विघ्नैर्नखंडंमंडलंयस्य । रमा मनोरमा भक्तानां आननेषु आभा उत्कृष्टदीप्तिर्यस्य । नवासर्वतो विलक्षणा कुः भूमिः येन । कुत्सितेष्वपि मा प्रमा अरुणं अनुरागश्रयस्मात् । तादृशं वनं च स्वीयं वृंदावनं च । तद्भजनानंदसंबंधिन्यो याः कोमलाकठोरताशून्या गावो वाचस्ताभिः अभि रंजितं दृष्ट्वा । ॥ श्रृंगाररसपक्षेतु । कौ भूमौ यामुत् तद्वंतं कु

तत्रचव्यापकपयः पयोधौ वृंदावनं श्वेततद्गोभिरंजितं श्वेतद्वीपो – – बद्धबाहवो द्रुमाएवपार्षदाः हरिरेव हरिः राधैवरमा तत्सख्यएवसख्यइति तदाव्हानाय कलंजगौ इतिध्वनिः ॥

मुदादिकुसुम रचनावत्त्वंवा॥ नमाकृतजनश्रृंगारवत् खंडमंडलंयस्य॥ रमाणामाननेषु आभाकांतिर्यस्मात्॥ यद्वा रमाननसंबंधेनैवाभाकां
तिर्यस्य॥ तदाननेष्वेवासमंतात् भातीतिवा॥ नवकुंकुमादिना अरुणत्वंयस्मिन्॥ तादृशं वनंच॥ तद्धृंगाररसान्वितगोभिः वचोभिः अभि रंजितंदृ
ष्ट्वा॥ वसंतपक्षेपि॥ तथैवकुमुत्विकासोयस्मिन्॥ सकलवनगतपुष्पलतादिविकासेन नखंडंमंडलंयस्य॥ कामोद्दीपनतयावा नखंडं भवति
कामिनीनांमंडलंयस्मिन्॥ रमाननानामिवविकसितकुसुमनसामाभायस्मिन्॥ नवाविलक्षणवर्णाकुः भूमिः यस्मिन्॥ कोः पृथिव्याः शोणपुष्पादि

गोभिरंजितंजगौकलंवामदृशांमनोहरं॥३॥

नामाशोभाअरुणायस्मिन्॥ तादृशं॥ वनंच त[illegible]त्संबंधिनीभिः कोमलाभिः कोकिलादिगोभिः अभि रंजितंदृष्ट्वा॥ प्रियामुखपक्षेतु॥ कुत्सितेष्वपि
मुनुमोदोनुग्रहोयस्य॥ तथाअखंडंवर्तुलंमंडलंयस्य॥ अखंडंकृष्णंमंडयतिलात्यनुगृह्णातिवा॥ तथारमाणांगोपीनांआननेषुआभायस्य॥ रमाननेषुआ
समंतादंशाभवेशेन भातीतिवा॥ तथानवकुंकुमेनकृष्णार्पितेनारुणं तादृशं भावनयादृष्ट्वा॥ वनंच तत्त्वप्रियधामतया तत्कोमलाभिः प्रशंसिकाभिः गोभिः अभि
रंजितंदृष्ट्वा॥ गोपीसमूहपक्षेतु॥ कृष्णतत्प्रियामुखचंद्रस्मितप्रभाविकसनशीलकुमुदाकारनेत्रवंतं॥ तथानित्यनिरतिशयप्रीतिमत्तयानपगामित्वेननखं
डंरासमंडलंयेन तं॥ तथा रमायाअंशावेशात् आननेषुआभायस्य॥ अतएवरमाकृष्णरमणा हि आननाभायस्यतं॥ बहिः श्रृंगारधृतेन नवेनकुंकुमेनारुणं मन

३७

वै

सिञ्च नवकुंकुमसदृशेनानुरागेणारुणं दृष्ट्वा। वनंच समस्तवृंदावनंच यत्रतत्र तत्कोमलाभिः विरहखेदेन रमणाभिलाषेण च विनयरूपाभिर्गुणिगानरूपाभि
अभि श्चगोभिः रंजितं दृष्ट्वा। कलंजगौ। अत्रैवं शंका। गोंतात्तसुरुषात्टचूस्यात्। नतद्धितलुकि। इतिसूत्रेणतत्कोमलगोभिरितिनभवति तत्कोमलगौरितिस्यात्। किंच
जगौ कलंवामदृशांमनोहरमिति अत्रश्लोके कर्त्ता नास्ति। पूर्वोक्तप्रथमश्लोकस्य भगवान् जगौ इतिचेत्। अत्रकुलकमपिनास्ति अतः इदं लापनमसंगतंमत्वा र्थंतिरं
कल्प्यते। वनं। च। तत्। कः। अमलगः। अभिरंजितं। कः जगौ। तर्हि अमलगः अमलं मलरहितं गीयते सौ। यद्वा। अमलैः निष्पापैः व्यासप्रभृतिभिः गीयते सौ॥
यद्वा। रलयोः सावर्ण्यमभिमेत्य अमरगः। अमरैर्देवैः गीयते सौ। यद्वा। कोमलगः। कोमलं यथाभवति तथागीयते सौ। अभिरंजितं तद्वनं दृष्ट्वा कलंजगौ। ध्वनौ
तु मधुरास्फुटे कलः इतिकोशोक्तेः मधुरं रसमयं परमाल्हादकं। एकमपिगानगतरवं स्वस्वनाम्नाव्हानतया भासमानत्वादस्फुटंच। तथा समस्तव्रजव्याप्तमपिरा
सानधिकारिणांश्रवणागोचरत्वेनास्फुटं। केनस्रुखेन लाति। अनुगृण्हातीतिवाकलं। केनस्रुखातिशयेन लीयतेचित्तमस्मिन्नितिवाकलं। पुनः कीदृशं। वामदृ
शांमनोहरं। वामेदृशौ यासां स्वविलासार्हतया तासांमनोहरं। वामे सुंदरे कृष्णे वासंलग्ने दृशौ यासां। वामे कुलमर्यादादिभ्यो विपरीते वा दृशौ यासां तासां प्रेमाति
शायत्वेनमनोहरं। वामे स्ववामभागे पतिभावनया दृशौ यासां तासां। येयथामांप्रपद्यंते तांस्तथैव भजाम्यहं इति स्वप्रतिज्ञातभावनापूरकत्वेन वामनोहरं। वामे
त्रिवे दृशौ यासां। त्रिवेकतानचित्तानामपि मनोहरं। अत्रापिशंका। निग्राम्यगीतं तदनंगवर्धनं इतिचतुर्थश्लोकोक्तगीतस्यानंगवर्धनता कुतः एवंचेत्। कलंज
गौ इत्युक्त्या तद्गानविषयककामबीजोच्चारमेवाह। कलं वामदृशांमनोहरमिति। कलमितिककारंलकारंच वामदृक् ईकारः मन अनुस्वारः हरमर्धमात्रात्मक इति।
यद्वा। कलमित्यत्रैव ककारलकारानुस्वारसंग्रहः वामदृक् ईकारः ककारलकारयोरुच्चारणार्थमिहिताकारापवादेन तत्र ईकारसंबंधविधानार्थषष्ठी। बहुवचनंचा

॥ यद्वा तत्कः तासां गोपीनां कंयस्मात् ॥

त्राविवक्षितं मनोहरमितिपदंपृथगेवं अर्धमात्रायाअनुच्चार्यत्वेनानभिधानं॥ गानंचात्रवंश्यैव कुतः योगमायामुपाश्रितइत्यत्रोक्तत्वात्॥ तथाच यथालो
केवंशापर्वगच्छिद्रद्वारा क्षेत्रेउप्तंबीजं बहु प्ररोहति तथाविरहकर्षितेघनश्यामप्रेमरसार्द्रेतासांहृदयक्षेत्रेवंशापर्वात्मिकमुरलिकाद्वाराउप्तंकामबीजंशीघ्रमेवबहु
फलिष्यतीत्यवधार्यवंश्याकलंजगौ इतिध्वनिः॥ तदेवचाग्रेवक्ष्यति॥ अनंगवर्धनमिति॥ यद्वा॥ रात्रीः शारदोत्फुल्लमल्लिकाः वीक्ष्यरंतुंमनश्चक्रे॥ रमाननाभं
कुमुद्वंतमखंडमंडलंदृष्ट्वाकलंजगौ इत्यस्यायमभिप्रायः॥ निशांराधाकारांदृष्ट्वोद्दीपितमनोजोरंतुंमनश्चक्रे कलंचजगौ॥ तत्रचंद्रंरमाराधा तदान
नाभंचंद्रगतश्यामांकंमृगमदबिंदुचंद्रिकास्मितं॥ अरुणं॥ तदीयसीमंतसिंदूरं॥ नीलांबरंतन्नीलांबरं॥ भगणास्तद्भूषणानि इतितद्विभागः॥ २॥ ॥३॥

35

॥ह्री॥

निशम्येति व्रजस्त्रियस्तद्वंशगीतमनंगवर्धनं निशम्य कृष्णगृहीतमानसाः सत्यः असापत्न्यार्थमन्योन्यमलक्षितः नज्ञापितः उद्यमो याभिस्ताः तथा जवेन वेगे न लोलानि चंचलानि कुंडलानि यासां ताः सकांतो यत्र तत्र गीतध्वनिमार्गेण आजग्मुरित्यन्वयः १ तद्गानसाफल्यं निरूपयति तत्र व्रजस्त्रिय इत्यत्र व्रजस्य-स्नेहमयधामत्वात् स्नेहमय्यः तेन स्नेहमभावेनैव कृष्णं प्रति व्रजनशीला इति वा वंशगीतस्यानंगवर्धनमिति विशेषणे चायं ध्वनिः यथा रूक्षे वने स्नेहपूरिते स्थितोग्निर्वंशद्वाराधमनेन वर्धते तदा च घनश्यामवर्षितजीवनमेव तदुपशमोपायः तथा विरहार्कतापरूक्षे वने स्नेहपूरिते तासां देहे त्वद्धच्छयाग्निः स च वंशाधममोहृतगीते न प्रज्वलितः वंशानां वायं स्वभावः स्वस्मिन्पवनसंपर्केण वन्हिमुत्पाद्य स्ववंशं दहंति येषां स्ववंशदाहप्रवृत्तिः तद्वंशभववंशस्यान्यदाहे किमु वाच्यं किं च भगवन्मुखनिर्गत

निशम्यगीतंतदनंगवर्धनंव्रजस्त्रियः कृष्णगृहीतमानसाः आजग्मुरन्योन्य
मलक्षितोद्यमाः स यत्र कांतो जवलोलकुंडलाः ४ कृष्ण कृष्ण

वायोरपि मुखादग्निरजायत वायोरग्निरिति श्रुत्या स तत एवाग्निजनकयोः किमु वाच्यं त्वद्धच्छयाग्निवर्धने कामश्च रुद्रदग्धः स्वयं अनंगः सर्वेषां मध्यात्स्वदाहमिच्छन्नपि विशेषतः शंभुवैरं स्मरन् कुच शंभुं मूलतो दग्धुं तन्मूले हृदयेऽनलरूपतया निवसन् कृष्णमुखानिलबंधुतया प्राप्तप्रतापः मलयायैवमवहृते तथा च प्रज्वलिते त्वद्धच्छयाग्नौ घनश्यामरसतृष्णया तदुपशममालक्ष्य तज्जन्याग्नेः स्वकारणादेव उपायं विचिंत्य दावाग्निपानेन च विश्वस्य यत्र स घनश्यामस्तत्र त्वत्कारत्वेन तदुपसंहारसमर्थः कांतः कं जलं तस्य अंतो वधिभूतो रसजलनिधिस्तत्राजग्मुः यद्वा तत्कामबीजं भगवता वंशपर्वछिद्रद्वारा त्वत्क्षेत्रं उप्तं तत्प्रेमार्द्रभूमिलाभेन रोमपुलक

रूपेणांकुरितं पुनश्चविरहार्कतापेनशुष्यदवगत्य अश्रुसलिलेन सिंचितमपि तापोष्णजलेन तद्रक्षणासंभवमाकलय्य यएव बीजं वपति सएव सिंचति घनश्यामोयत्र तत्राज
ग्मुः यद्वा ब्रह्मेंद्रादीन् स्वप्रतापैः पराभूय तद्विजयीकामः श्रीरुद्रेणदग्धः सचानंगः सन् भूतपतेरपिभूतवद्बाधकोऽभूत् तद्विजयाय समुद्यतो भगवान् नत्वपूर्णमनोजमिं
दुंराहुरपिद्रुत्यति यत्रयोगेश्वरः कृष्णास्तत्रध्रुवानीतिरिति वचनात् रिपुर्वर्धयित्वाजेतव्यः रतिनृपनीतिमनुस्मृत्य स्वानुरागिणिमनोगृहे तत्प्रदेये गानरसान्वित कामबीजक्षेपे
णतमनंगमपि तदंगेषूद्भाव्य यावन्मनः स्वार्थमनोजस्वातंत्र्यंच रतिरणासंभवमाकलय्य मनोहरेणस्वगीतेनश्रवणं यथा तद्गृहत्दपमविषेन तन्मनः स्वरागरागित्वा द्गृहात्व
द्वज्यहृद्रदनत्हृत्सदनवदनादिविविधविबुधविबोधीकर कुसुमास्पदस्वद्धुविवनेप्रस्थाप्य तत्क्षेत्रजमनोज विविधहृद्रदनसेंद्रनील वज्रमणि रत्नाद्युपस्कर गोपीतनुकामग
कांचनपुरेषु त्हृत्कमलसिंहासनेषुअरुणसितासिततन्नयन तीर्थराजसलिलैरभिषेचयामास सचकुसुमायुधःकामः कृतघ्नतयातदुपकारं विस्मृत्य मनः स्वपितरं कृष्णगृही
तंमत्वा रतिरणाय काममगात् कुसुमस्तकुट्टुचयमुक्तामालाभिंदिपालालकाहिपाशांकं शरवक्रकचक्रभ्रूयुगासिधनुर्नेत्रिशलाकापांगभल्लकरणोपस्करयुतान् स्वस्व
वर्णदुर्गान् गोपीवपूंषि स्वायुधकुसुमपूरितस्वमित्रवसंताक्रांतवनांतर्गतं कृष्णं स्वसंमीलितस्ववंशजतदीयगीतदूतेनावगत्य तंप्रतिमदनत्वात् मदोत्साहेन प्रेरयामास तत्प्रेरिता
स्ताः रतिरणस्यकांतेनैवोचितत्वात् यत्रसकांतस्तत्राजग्मुः किंभूताः जवलोलकुंडलाः जवेनमदनप्रेरितरतिरणायगमनवेगेनलोलानि मकराकृतीनि मकरध्वजरूपाणि
कुंडलानियासांताः इतिपूर्वोक्तिपदसमुदायाभिप्रायः पुनः कथंभूताः अन्योन्यमलक्षितोद्यमाः गृहीतमनस्त्वेन परविचाराक्षमत्वात् कामनृपप्रेरणयाप्रवृत्ताऽवलब्धवि
चारावसरत्वात्च अलं यद्वा व्रजस्त्रियः गृहकर्माणिविहाय किमर्थमागताइतिचेत् पद्यैस्तासामागमनहेतुंदर्शयति शारदागमविशारदराकानायकाधिकविकासितका
मा यामियामुनतटीनिकटस्थंश्यामधामनिजधामविहाय १ कुंजेशारदिवसंतकुसुमेष्वनुभूतविविधरसगंधं भ्रमरंद्रष्टुंयामी त्यूचेकाचित्स्फुटंस्वगुरुसविधे २
त्यजंतुबतमांपतिभ्रातृक्रूरबंधुवर्गाश्चिरंब्रवीतुकिमपिव्रजास्थितजनोव्रजाम्येवतं करोतिमुरलीयतः कुशालदूत्यकंमत्कृते ततश्चपरमाधरामृतरसंपिबाम्यंजसा ३

३६

६

लब्धं स्कंखं समपहाय परंपरस्याः कावायेतेत सहचर्यपि सौख्यदाने एकैव तत्त्वमसि धन्यतमा यदन्यामाकारयस्यतुलरत्यधरामृतास्यै ४ यस्मादस्त्वधुनेत्राः ससदारा
मोविरामवृत्तिरतः अस्मच्चित्तविरामोनियतंभवितेति तत्रतंजग्मुः ५ देत्यारिरेषतनुतांतनुतापदानं यत्तस्यविश्रुतमहात्रमविशोभिवक्षः त्वं कोमलासिसरलासफला
सकलानुरागाच्चित्रंमुरल्यतनुतापमलंतनोषि ६ इत्युत्साहकृतानेककल्पनाक्षिप्तमानसाः निम्नोन्नतमजानंत्योगोपिकाः प्रस्थितास्तदा ६ अलं ४ ४

दुहंत्योभिययुः काश्चिद्दोहं हित्वा समुत्सुकाः पयोधिश्रि

त्य संयावमनुद्वास्यापरा ययुः ५ कृष्ण

कृष्णसूचकशब्दश्रवणेन तत्प्रवणचित्तानां तत्क्षणमेव त्रैवर्गिककर्मनिवृत्तिं द्योतयंत्य इवार्थविसितं कर्म विहाय ययुः तदाह दुहंत्य इति पयः स्थालीस्थंचुल्यामधि
श्रित्यैतत्क्वाथमप्रतीक्षमाणाः काश्चिद्ययुः संयावं गोधूमकणान्नं पक्वमनुद्वास्य अनुत्तार्य १ श्वस्तेनेपिस्फलभोभवेद्यंगोस्तनेरसदुहेति किंततः स्वस्तनद्वयस्फख
धिकारणं स्वस्तनीक्षुदितमाश्रयेरसं १ यत्स्वयंनापभाक् तत्किं कुर्यास्सिरमतापकं घनंतत्तापहर्तारं कलयेकलितामृतं २ ॥५ ५ ५ ५

परिवेषयंत्य इति स्वकृतानपहाय तास्तदाययुरत्रासक्तिनचित्रमण्वपि स्फुटमेवयदंगसंगिनीसुतमालाधिकशालिनीरुचिः १ पतिशुश्रूषणंकार्यंस्त्रियेत्येतद्धेतो
ध्रुवं विदेहावस्थितोसत्यांयुक्तंश्रीपतिसेवनं २ ६ ६ ६ ६ ६ ५
७ ७ ७ ७ ७ ७ ७ ७ ७

परिवेषयंत्यस्तद्धित्वा पाययंत्यः शिशून्पयः शुश्रूषंत्यः पतीन्काश्चिदश्नंत्यो
पास्यभोजनं ६ लिंपंत्यः प्रमृजंत्योन्या अंजंत्यः काश्चिल्लोचने व्य
त्यस्तवस्त्राभरणाः काश्चित्कृष्णांतिकं ययुः ७ ७

लिंपंत्य इति अन्याः प्रमृजंत्यः अंगोद्वर्तनादिकुर्वंत्यो काश्च काश्चित्कृष्णतुष्ट्यर्थंकिमर्तदासक्तमनसा मन्यथाकृतमपिफलत्येवेतिद्योतयन्नाह व्यत्यस्तेति स्थान
नतः स्वरूपतश्चोर्ध्वाधोधारणेन विपर्ययंप्राप्तानि वस्त्राभरणानियासांताः १ सिध्येत्किमिष्टमेतेनलेपोयमवलेपकृत् सलेपोयद्विलेपेनातनुतापत्हृतिःस्फुटा ७

36

नचकृष्णाकृष्टमनसां विघ्नाः प्रभवंतीत्याह ॥ तावार्यमाणा इति ॥ मोहिता इति मया लक्ष्मीरूपेण ऊहिताः इति वा ॥ ८ ॥ नलब्धो निर्गमो याभिस्ताः प्राग
पि तद्भावनायुक्ताः ॥ तदानितरां दध्युरित्यर्थः ॥ कृषिर्भूवाचकः णश्च निर्वृतिवाचकः ॥ तयोरैक्यात्परंब्रह्म कृष्ण इत्यभिधीयते इति ॥ ९ ॥ ॥ ॥ ॥ ९ ॥
किंच तदानीमेव तं परमात्मानं कृष्णं ध्यानतः प्राप्ताः सत्यः गुणमयं देहं जहुरित्याह श्लोकद्वयेन ॥ दुःसहेति ॥ ननु कथं जहुः परमात्मेति ज्ञानाभावादित्याशंक्या

तावार्यमाणाः पतिभिः पितृभिर्भ्रातृबंधुभिः ॥ गोविंदापहृतात्मानो नन्यवर्त्तंतमोहिताः ॥ ८ ॥

अंतर्गृहगताः काश्चिद्गोप्योलब्धविनिर्गमाः ॥ कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ॥ ९ ॥

दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ॥ ध्यानप्राप्ताच्युताश्लेषनिर्वृत्याक्षीणमंगलाः ॥ १० ॥

ह ॥ जारबुध्यापीति ॥ नहि वस्तुशक्तिर्बुद्धिमपेक्षते ॥ अन्यथा मत्त्वापि पीतामृतवदिति भावः ॥ ननु तदपि प्रारब्धकर्मबंधने सति कथं जहुस्तत्राह सद्यः प्रक्षीण
बंधना इति ॥ ननु कथं भोगमंतरेण प्रारब्धं कर्म क्षीणं ॥ भोगेनैव सद्यः क्षीणमित्याह दुःसहेति ॥ दुःसहो यः प्रेष्ठविरहस्तेन तीव्रतापस्तेन धुतानि गतानि अशुभा
नि यासां ॥ तदप्राप्तिपरमदुःखभोगेन पापं क्षीणमित्यर्थः ॥ तथा ध्यानेन प्राप्ता अच्युतस्या श्लेषेण या निर्वृतिः परमसुखभोगः तया क्षीणं मंगलं पुण्यबंधनं यासां
ताः ॥ अतो ध्याने न परमात्मप्राप्तेस्तत्कालसुखदुःखाभ्यां निःशेषकर्मक्षयाद्गुणमयं देहं जहुरिति ॥ १० ॥ ॥ ॥ १० ॥ ॥ ॥ १० ॥ ॥ ॥

९ ॥११॥ ॥ननुयथापतिपुत्रादीनांवस्तुतोब्रह्मत्वेपिनतद्भजनान्मोक्षस्तथाबुध्यभावात्॥एवंकृष्णेपिब्रह्मबुध्यभावेनतत्संगतिः कथंमोक्षहेतुरितिशंकते॥कृष्णं
विदुरिति॥परंकेवलंकांतंकमनीयंविदुःनब्रह्म॥१२॥ परिहरति उक्तमिति॥अयंभावः॥जीवेष्वावृतंब्रह्मत्वंकृष्णस्यतु हृषीकेशत्वादनावृतमतोनतत्रबुध्यपेक्षे
ति१॥ यद्वा॥अधोक्षजप्रियाइति॥ अधोक्षजं ऐंद्रियज्ञानंयस्मात्॥अधः अधमेषुअक्षजाकृपादृष्टिर्यस्येतिवा॥अधः स्वचरणशरणप्राप्तेषुअक्षजाकृपा

॥तमेवपरमात्मानंजारबुध्यापिसंगताः॥जहुर्गुणमयंदेहंसद्यःप्रक्षीणबंधनाः॥११॥राजो
॥वाच॥कृष्णंविदुःपरंकांतंनतुब्रह्मतयामुने॥गुणप्रवाहोपरमस्तासांगुणधियांकथं॥१२॥
॥श्रीशुकउवाच॥ उक्तंपुरस्तादेतत्तेचैद्यःसिद्धिंयथागतः॥द्विषन्नपिहृषीकेशंकिमुताधोक्षज

चसेमभावनयातन्निति
भाति। किमुताव्यक्तं तथा
धोक्षजस्यप्रियाइति॥१३॥

दृष्टिर्यस्येतिवा॥अधः अक्षजः सूर्यप्रकाशः यस्मादितिवा॥अधः अक्षं इंद्रियं मनस्तस्माज्जातश्चंद्र आल्हादोवायस्मात्॥अधः अक्षजो सु- प्रियाः॥१३॥
खजोवन्हिस्तेजस्विवायस्मात्॥अधः अक्षजाः सूर्यचंद्राग्नयोध्येयासनेवायस्य॥अधः अक्षजोमनोजोमनोहरत्वादौयस्मात् सः॥अधोक्षजःप्रियोयासां॥तथा 38

ननुदेहीकथमनावृतःस्यादतआह नृणामिति गुणात्मनः गुणनियंतुः भगवतएवंरूपा अभिव्यक्तिः अतोनदेहिसादृश्यमत्रवक्तुंयुज्यतइतिभावः १४ ॥
अतोयथाकथंचित्तदासक्तिर्मुक्तिकारणमित्याह काममिति ऐक्यं संबंधं सौहृदं भक्तिं १५ नचभगवतोयमतिभारइत्याह नचैवमिति यतःश्रीकृष्णादे
तत् स्थावरादिकमपिविमुच्यते १६ प्रस्तुतमाह तादृष्टेति वाचःपेशैर्वाग्विलासैः १ यद्वा अंतिकमित्यत्र अंतिकं स्वसमीपमायाताः यद्वा अंति समीपेकं

नृणांनिःश्रेयसार्थायव्यक्तिर्भगवतोनृप अव्ययस्याप्रमेयस्यनिर्गुणस्यगुणात्मनः १४
कामंक्रोधंभयंस्नेहमैक्यंसौहृदमेवच नित्यंहरौविदधतोयांतितन्मयतांहिते १५
नचैवंविस्मयःकार्योभवताभगवत्यजे योगेश्वरेश्वरेकृष्णेयतएतद्विमुच्यते १६
तादृष्ट्वांतिकमायाताःभगवान्व्रजयोषितः अवदद्वदतांश्रेष्ठोवाचःपेशैर्विमोहयन् १७

सुखं यथास्यात्तथा सुखेनायाताः यद्वा अंति आत्मने कृष्णायवासुखं यथास्यात्तथाआयाताः यद्वा अन्तिकं साक्षात्स्वयं समागतं स्वर्गमिवायाताः यद्वा कंनिस
सर्गलीलाधाम पुलिनाख्यमायाताः यद्वा कं नदीजलमिव कंसिंधुजलंप्रति आयाताः ॥१७॥ १७ १७ १७

सर्वाः ससंभ्रममागताविलोक्य सभयमिवाह व्रजस्येति १ श्रीभगवानुवाच स्वागतमिति तत्रौदासीन्येपि सादरभाषणमिति सज्जनपथोपदेशस्य सादरोक्तिः वः स्वस्त्यागमनंजातं ननुकिमत्यादरःक्रियते तत्राह महाभागाइति यूयंमहासौभाग्यवत्यः स्वस्वगृहे प्रतिष्ठार्हाः स्वज्ञातिवर्गे सौभाग्यवतीनामादरउचितएव यद्वायतो यूयंमहाभागाः महत्सौभाग्यवत्यः अतो वोस्मिन्वने किंस्वागतं स्वस्त्यागमनं अपितुनतथा अत्रवःकिंप्रियं नकिमपीत्याक्षेपः यद्वा औदासीन्येन प्रश्नएव वः अत्रकिमिति स्वागतं किमुद्दिश्य सुस्वागमनंकृतं स्वागतमेवेतिचेत्तत्र पुनः प्रश्नः किं अत्रवःप्रियं अहंनजानामि त्वदधीनमेवास्मत्प्रियमितिचेत्तत्राह किंकरवाणि भवत्प्रियं कर्त्तव्यमपि मयानज्ञायते यद्वा किंकरवाणीति मयाकिमपिकर्त्तुंनशक्यते ननुसर्वदा सर्वापत्सु समस्तव्रजरक्षणादिप्रियंत्वयैवक्रियते अधुनास्मदागमनेकिमि

श्री ग नु च स्वागतंवो महाभागाःप्रियकिंकरवाणिवः व्रजस्या

त्यौदासीन्यं तत्राह व्रजस्येति कच्चिद्व्रजस्यानामयंवर्तते कोप्युपद्रवस्त्कैनैवजातः सत्युपद्रवेस्वागमनकारणंब्रूत प्रार्थनापक्षेतु वः स्वागतं मदाह्वानमात्रेण मदुपरिकृपया मत्कृपयावा स्वस्त्यागमनंजातं यतो यूयंमहाभागाः महासौभाग्यवत्यः स्वसौभाग्येनममापि भाग्यंवर्धयंत्यः यद्वा मदनुग्रहाद्दूरदानेन प्रीत्या आवाहेनेन मदेकांतदर्शनलाभेनच उद्भुतमहाभागाः यद्वा महत्सौममैवभागाः नान्यस्यकस्यचिद्युस्माकस्त्वाम्य यद्वा महत्याः श्रीमत्याः प्रियायाभागाःअंशाः अ

३२

यालीलयाधृत ३ ४ ५ ६ ७ ८ तांनिरीक्ष्य प्रीतः सन् स्मयमानो हरिराबभाषे कथंभूतां अनन्यगतिं नअन्यागतिर्यस्याः सा अनन्यानां स्वभक्तानां गतिं इतिवा धृततनोः धृतास्तनवः
नरतनोस्तस्य अल्पाः विरलाः कृशाः येनषा अनुरूपरूपां अनुरूपं रूपं यस्याः तां यथोक्तं पराशरेण देवत्वे देवदेहेयं मनुष्यत्वेचमानुषी विष्णोर्देहानुरूपांवैकरोत्येषात्मनस्तनुमिति ॥
यद्वा अनुरूपं तुल्यं सौंदर्यं यस्याः २ अनुपश्चात् रूपं यस्य स भगवान् तत्स्पृष्टवानदेवानुभावित्वात् तद्वत् रूपं यस्याः ३ अनुरूपो भगवान् तं रूपयति ४ रूपरूपक्रि
यायामिति धातोः अनुरूपं यस्य तत्प्रतिबिंबभूतं रूपं यस्याः भगवत्प्रतिबिंबभूतं रूपं यस्याः ५ अनुरूपः हीनरूपः रूपं स्वभावो स्याः चंचलत्वात् अनुहीने सहार्थे च पश्चा

तांरूपिणींश्रियमनन्यगतिंनिरीक्ष्य यालीलयाधृततनोरनुरूपरूपा
प्रीतःस्मयन्नलककुंडलनिष्ककंठवक्त्रोल्लसत्स्मितसुधांहरिराबभाषे ९

त्सादृश्ययोरपि इतिमेदिनी ६ अनुरूपेषु प्रतिबिंबभूतेषु जीवेषु रूपं यस्याः मायाधीनत्वात्सर्वजीवानां ७ अनुरूपो भगवान् तदिवरूपं स्वभावोऽस्याः ८ अनुरूपो यो
ग्योरूपं स्वभावोस्याः ९ अनुरूपो भगवान् तद्दिवसौंदर्यं यस्याः १० भगवतः यत् अनुपश्चात् देहधारणोत्तरं सगुणमित्यर्थः रूपं तदिवरूपमस्याः ११ अनुरूपं भगवंतं
रूपयति प्रकाशयति १२ पूर्वरूपक्रियां करोति अनुयथा निजः तस्य रूपं स्वभावः पित्राज्ञोल्लंघनरूपधर्महानिकरः तद्वत् रूपं धर्महानिकरः स्वभावो यस्याः १३ अनुरूपाः

श्रीगणेशायनमः अथषष्टितमे कृष्णाः परिहासेन रुक्मिणीं कोपयित्वाततः प्रेमकलहेतामसांत्वयत् १ रामारामजनानंदमहोदयविडंबनैः रुक्मिण्याप्रेमकलहद्धु
द्मनैश्वर्यमीर्यते २ स्वतल्पस्थं स्वपर्यंकस्थं १ सुखंयथास्यात्तथाआसीनं स्वस्याः आत्मीयायाः लक्ष्म्याः पर्यंकस्थं यद्वा सुखं शोभनेंद्रियं यद्वा सुष्ठु खं आकाशं
तत्रत्यायामातयाआसीनं यद्वा सुषमासीनं सुषमापरमाशोभा स्वतल्पस्थं स्वस्यआत्मनः तल्पं कलत्रं तत्रास्थितं तल्पंमंचकलत्रयोः तत्रस्थितंजगद्गुरुं पर्यचर
त् भैष्मी कीदृशी व्यजनेनसखी विः तिर्यक् गरुडः अजोब्रह्मा नः सुगतः तेषां इनः सर्वेशः कृष्णः तत्सखी अस्यजनाः अजनाः विगताः अजनाः यस्याः सा इन

श्रीशु॰ कर्हिचित्सुखमासीनंस्वतल्पस्थंजगद्गुरुं पतिंपर्यचरद्भैष्मीव्यजनेन

सखीजनैः १ यस्त्वेतल्लीलयाविश्वंसृजत्यत्यवतीश्वरः सहिजातःस्वसेतूनांगोपीथाययदु

ष्वजः २

सखीच विशेषेण अजनाः यस्यांसा पतिं पर्यचरत् १ वक्ष्यमाणं रुक्मिण्याः श्रीकृष्णे परमं प्रेम संभावयितुं तस्योत्कमेव तत्वमनुस्मारयति यस्त्विति २ २

४०

तुल्याः रूपाः लोकाः यस्याः १४ अनु पश्चात् रूपः पक्षद्वंदोस्यस अनुरूपः कृष्णः तदिवरूपमाकारोस्याः १५ अनुरितिपृथक्पदं रूपमिव आकारस्वरूपंसौंदर्यंयस्याः १६
रूपमिवरूपंस्वभावोस्याः १७ अनुरूपोभगवान् तदिवरूपंशब्दोस्याः १८ भगवतःअनु रूपमाकारः सौंदर्यंचयस्याः १९ कीदृशास्यधृततनोः अनुः नृशब्दस्यनुरितिष
ष्ठ्येकवचनं ननरस्य उइतिनिपातोनिश्चयार्थः उपरूपासमीपेरूपमस्याः २० अनुरूपोभगवांस्तदिवश्लोकायस्याः २१ ग्रंथांतरेतोपशोभ्राब्देस्वभावेनाटकादिषु रूपमाका
रसौंदर्यइतित्रिकांडशेषः रूपंस्वभावेसौंदर्येनालोकपशुद्वंदयोः ग्रंथांवृत्तौनाटकादौआकारश्लोकयोरपीतिमेदिनी किंचालकैःकुंडलाभ्यांनिष्केणपदकेनचअलंकृतकंठेन
चतुर्दिक्षुशोभितेनवक्त्रेउल्लसंतीस्मितसुधायस्यास्तां ९॥ ॥सर्वगुणयुक्तायाअपितवबुद्धिर्मदेयोह राजपुत्रीत्याद्येकादशभिः २० (above the line: ग्रयेना)

श्रीशुकउवाच

॥ एतावदुक्त्वाभगवानात्मानंवल्लभामिव मन्यमानामविश्लेषातद्दर्पघ्नउपारमत् २१

अविश्लेषात्धेतोःआत्मानमेववल्लभामित्येवार्थेइवशब्दः २१ ५ ५ ५ ५ ५
५ ५ ५ ५ ५ ५ ५ ५ ५

त्रयाणांलोकानामीशास्तेषांपत्कः १ त्रयाणांवेदानांलोकस्यशास्त्रस्यचईशः ब्रह्माईशास्तस्पतेः २ लोक्यतेअनेनेतिलोकशब्दवाच्यंचक्षुः त्रीणिलोकाःनेत्राणियस्यसशिवः
ईशोयस्यसगणेशस्तस्यपत्कः ३ तिस्रोलोकायस्याःसात्रिलोकाशक्तिःतस्याःईशिस्यपत्युः ४ त्रिभिर्लोकैर्लोक्यतइतित्रिलोकःसूर्यःतस्यईशस्यपत्कः ५ त्रीणिलोकाश्च
क्षूंषियस्यसचासावीशशब्दवाच्यश्चतस्यपत्कः ६ त्रयाणांवेदानांरोकस्यनौकायाश्चईशस्यमत्सरूपिणःपत्कः नौकामावध्यमनवेरलावेदांश्चकृत्वनशङ्खकेःरोकंनाविचले
बिलेरितिकोशः ७ त्रिभिर्देवर्षिर्दिदैत्यैःरोकःचलःत्रिरोकोमंदराख्यःपर्वतस्तस्यधारणात् ईशस्यकूर्मरूपिणःपत्कः दैत्यैःसुरर्षिभिःशैलश्चांचलैसमपद्यतेति ८ त्रयोलोकाःय

इतित्रिलोकेशपतेस्तदात्मनःप्रियस्यदेव्यश्रुतपूर्वमप्रियं आश्रुत्य
भीतात्हृदिजातवेपथुश्चिंतांदुरंतांरुदतीजगामह २२ २२

स्यांसाभूमिःतस्याईशस्यवराहस्यपत्कः ९ त्रिधारोकोदीप्तिर्यस्यसदेवःनृसिंहरूपधारीनृसिंहस्तस्यपत्कः १० त्रिलोकेशोबलिस्तस्यपत्कःवामनस्य ११ त्रयाणांलोकानांक्षत्रियवि
ट्शूद्राणांईशस्यब्राह्मणरूपधारिणःपरशुरामस्यपत्कः १२ त्रीणिरोकाणिबिलवत्कूटानियस्यसत्रिकूटःतस्यईशोरावणस्तस्यपतेःपानकर्तुःनाशकर्तुःइतियावत् पापाने १३ ति
स्रःपुरीःपुगोकुलमथुराद्वारकाख्याःलोक्यतइतित्रिलोकःकृष्णःसचासावीशश्चतस्यपत्कः १४ त्रयाणांगुणानांवेदानांवर्णानांअकारोकारमकाराणांअवस्थानांकालानांलोकानांत्रईशस्यप
त्युः १५ तदात्मनःतच्छब्दःआत्मास्यतान्चोरान्द्यतिसतदःसःआत्मास्यतंअमृतंददातिआत्मास्य तश्चोरामृतपुद्धेषु इतिकोशः २२ २२ २२ ६२

२

[OrderDescription]
,CREATED=04.12.19 14:48
,TRANSFERRED=2019/12/04 at 14:58:58
,PAGES=85
,TYPE=STD
,NAME=S0002296
,Book Name=M-2216-SHRIMAD BHAGWAT MAHAPURAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF

FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF

FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF

FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF

FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,